# पूर्वोत्तरभारतेउपनिबद्धाः तान्त्रिकग्रन्थाः

डा. अनिल-कुमार आचार्यः
आम्बेडकर-महाविद्यालयः, फटिकरायः,
ऊनकोटी, त्रिपुरा
Email: acharyaanilkumar1@gmail.com

सर्वैः ज्ञायते यत् पूर्वोत्तरभारतं भारतस्य पूर्वतमप्रदेशान् निर्दिशति। तस्मिन्आहत्य अष्टौ भारतीयराज्यानि सन्ति। तानि यथा - आसामः, अरुणाचलप्रदेशः, मेघालयः, मणिपुरः, मिजोरामः, त्रिपुरा, नागालैण्ड्, सिक्किम्चेति। सिक्किम् राज्यंविहाय शेषं संयुक्ततया "सप्तभगिनी" इति नाम्ना प्रसिद्धम्। सिक्किम्-राज्येन साकम् एतानि अष्टराज्यानिआहत्य“अष्टलक्ष्मी” इत्यपि अभिधीयन्ते। एतेषु सर्वत्र हिन्दुधर्मस्य अस्तित्वं सत्यपि, केवलंआसामे, त्रिपुरायां, सिक्किमे, मणिपुरे, अरुणाचलप्रदेशे चहिन्दुजनानां संख्या अधिका वर्तते।परन्तु हिन्दुधर्मानुयायीनाम् अधिकतमा संख्यापूर्वोत्तरराज्येषु आसामे, त्रिपुरायां, सिक्किम्-राज्ये एव वर्तते। एकादशाधिकद्विसहस्रतमे वर्षे कृता जनगणनानुसारं सिक्किम-राज्ये हिन्दुनां संख्याधिक्यं प्रमाणितमपितत्र जनजीवने बौद्धधर्मस्य संस्कृतेश्च अधिकप्रभावः इति सामान्यधारणा। अतो हि यदा अत्र पूर्वेत्तरभारते तन्त्राणां तान्त्रिकग्रन्थानां वा विषये आलोच्यते, तदा पूर्वोत्तरभारतमिति पदेन केवलम् आसामरज्यं, त्रिपुराराज्यम्एव स्वीकृतं लेखकेन।

‘तन् प्रसारे’‘त्रै रक्षणे’ च इति एताभ्यां धातुभ्यां निष्पनं तन्त्रम् इति पदम्। तनोति त्रायति इति तन्त्रम्। अर्थात् तत्त्वात्मकस्य ज्ञानस्य प्रसारेण अज्ञानतां विनश्य साधकं त्रायतीदं तन्त्रशास्त्रम्।तस्मादुक्तं वाराहीतन्त्रे-

तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान्।
त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते।।

तान्त्रिकग्रन्थाः हिन्दुधर्मे, बौद्धधर्मे, जैनधर्मे च प्राप्यन्ते चेदपि अस्मिन् प्रबन्धे तान्त्रिकग्रन्थेत्यनेन पदेन हिन्दुधार्मिकपरम्परायां रचिताः तान्त्रिकग्रन्थाः एव स्वीक्रियन्ते। हिन्दुधर्मानुयायीषु शैवानां शाक्तानां वैष्णवानां अन्येषाञ्च हिन्दूपधर्मसम्प्रदायसम्बन्धाः तन्त्रिकग्रन्थाः प्राप्यन्ते। तन्त्रमिति पदंहिन्दुधर्मपरम्पपरायाम्आदौ प्रधानं विशेषज्ञानं वा इति अर्थे प्रयुज्यतेस्म।कालक्रमेण, प्रायः विशिष्य आदिशङ्कराचार्यस्य कालात्, पदमिदं शक्त्युपासनाशास्त्ररूपेण सुनिर्दिष्टं जातम्। आगमशास्त्रमित्यपि नामान्तरमस्य तन्त्रशास्त्रस्य। अस्मिन् तन्त्रशास्त्रेआगमशास्त्रे वा वैदिकाः अवैदिकाश्च विषयाणाम् उल्लेखः वर्तते। तन्त्रशास्त्रोक्तम् आगमशास्त्रोक्तं वा वर्णाश्रमधर्मपरं मोक्षपरं च वर्णनं

जम्बूद्वीप the e-Journal of Indic Studies
Volume 3, Issue 2, 2024, p. 12-20, ISSN 2583-6331
©Indira Gandhi National Open University

वैदिकज्ञानाधारितम्। तेषु पञ्चमकारसाधना शवसाधना षट्कर्माणि इत्येते विषयाः अवैदिकाश्चेति।तन्त्राणां संख्या विषये यद्यपि प्रायः प्रप्रथमं लक्ष्मीधरः शङ्कराचार्यस्य सौन्दर्यलहरि-भाष्ये चतुःषष्टितन्त्राणां उल्लेखं कृतवान्, तथापि तान्त्रिकग्रन्थानां संख्यायाः विषये निश्चयेन सर्वसम्मत्या च नकिमपि वक्तुं शक्यते।तस्मात् नैकान्यपि तन्त्रशास्त्राणि आगमशास्त्राणि वेति सामान्यनिश्चयः। अपि च तन्त्रग्रन्थानां वाम-दक्षिण-मध्यमाः, दिव्य-कौल-वामाः, यामल-डामरश्चेत्येताः विविधविभागाः स्वीक्रियन्ते विद्वद्भिः। इत्थं तन्त्राणाम् आगमानां वा संख्या-विभागयोः विषये मतान्यैक्यं स्थितेऽपि प्रायः सर्वेषुआगमेषु तन्त्रग्रन्थेषु वा विषयोपस्थापने आलोच्यविषये च काश्चन समताःदृश्यन्ते।प्रायः तन्त्राणामागमानां वा विषयप्रसरः शिव-पार्वत्योः वार्तालापेन भवतीति प्रथमा सामान्या रीतिः। तस्मादुच्यते -

आगतं शिववक्त्रेभ्यो गतं च गिरिजाश्रुतौ।
मतं च वासुदेवस्य तस्मादागम उच्यते।।

तन्त्राणां विषयविभागः पादचतुष्टयेषु क्रियन्ते इति द्वितीया समानता। ते पादाः यथा - ज्ञानपादः, योगपादः, क्रियापादः चर्यापादश्चेति। ज्ञानपादे तत्त्वदर्शनस्य, योगपादे मोक्षसाधनार्थम् संयमादिनामाध्यात्मानुशासनस्य, क्रियापादे पूजनपद्धति-यज्ञ-तीर्थयात्राणां, चर्यापादे साधकस्य आचरणीयानां कर्माणां साधनानां च वर्णनं प्राप्यन्ते।

पूर्वोक्तमासीत् पूर्वोत्तरभारतस्य तन्त्रस्य च संक्षिप्तपरिचयः।इदानीम् आसामराज्ये त्रिपुराराज्ये च रचितानां तान्त्रिकग्रन्थानां विवरणं प्रदीयते। तत्रादौ विचारयामः आसामराज्ये रचितानि तन्त्रग्रन्थानि। वयं सर्वे जनीमः पूर्वोत्तरभारते शक्ति-आराधनायाः अन्यतमं प्रमुखं प्राचीनतमं च स्थानम् आसीत् प्राग्ज्योतिषः, कामरूपदेशः, आसामराज्यं वा इति। तत्र विराजति परमाराध्यादेवी कामाख्या कामाक्षी वा इति।तन्त्रसाधनायां पूर्वोत्तरभारते आसामराज्यस्थस्य कामाख्यापीठस्य महिमा सर्वजनविदितासर्वप्राचीना च। अष्टमशतकीये हेवज्रतन्त्रे उल्लिखितेषु चतुर्षु शक्तिपीठेषु अन्यतमः कामरूपशक्तिपीठः।अस्य पीठस्य वर्णनापराः अथवा पीठमिदम् उररीकृत्य रचिताः बहवः तान्त्रिकग्रन्थाः सन्ति। तेषु प्रमुखाः प्रकाशिताः इदानीं चोपलब्धाः ग्रन्थाः कालिकातन्त्रम् कालिकापुराणम् वा, योगिनीतन्त्रम्, कामाख्यातन्त्रम्, तारार्चनतन्त्रम्, कामरूपयात्रापद्धतिश्चेति।[1]अपि च कामरत्नतन्त्रस्य प्रकाशितं आसामभाषासंस्करणमपि उपलभ्यते। एतान् पठनार्थं समुपलब्धान् प्रकाशितान् तान्त्रिकग्रन्थान् विहाय गवाक्षतन्त्रम्, बृहद्गवाक्षतन्त्रम्, मत्स्यतन्त्रम्, त्रिपुरार्णवतन्त्रम्, उत्तरतन्त्रम्, कामेश्वरतन्त्रम्, वाराहीतन्त्रम् चेत्यादयः आसामसम्बन्धाः तान्त्रिकग्रन्थाः केवलम् उद्धृत्याकारेण अस्माकं ज्ञानगोचराः भवन्ति।

[1]Barthakuria, 2009

इतोऽप्यन्ये च अद्यावधिअज्ञेयाः मातृकाग्रन्थरूपाः नैकाः तान्त्रिकग्रन्थाः स्युः इति मे मतिः। तेषाम् अज्ञातानां आसामक्षेत्रे रचितानां तन्त्राणाम् उद्धरणाय जनसम्मुखम् आनयनाय इतोऽपि अधिकं गवेषणाकार्यम् आवश्यकम्।

अधुना आसामराज्ये रचितानाम्उपरि उल्लिखितानां प्रकाशितानाम् अप्रकाशितानां च तान्त्रिकग्रन्थानां विषये संक्षेपेण आलोचयामः। एषा आलोचना प्रायः श्रीअपूर्वचन्द्रस्य पुस्तकाधारिता वर्तते।

**(1)कालिकातन्त्रम्**– उपरि उल्लिखितेषु तान्त्रिकग्रन्थेषु सर्वापेक्षा प्राचीनः तान्त्रिकग्रन्थोऽयम्। अस्य लोकप्रियाणि नामान्तराणियथा – कालिकापुराणम्, कालीपुराणम्, सतीपुराणम् वा इति। अष्टादससु उपपुराणेषु अन्यतमं इदं पुराणम् तन्त्रम् वा। अस्य ग्रन्थस्य रचना आसामराज्ये अथवा कूचबिहारक्षेत्रे अभवद् इति विद्वांसः वदन्ति।[2]हजरावर्येण अस्य ग्रन्थस्य रचना वङ्गदेशे इति स्वीक्रियते। परन्तु विश्वनारायण-शास्त्री-वर्येण अस्मिन् ग्रन्थे कामरूपस्य, ब्रह्मपुत्रनद्याः, कामाक्षीदेव्याः महिमा, इत्येतान् विषयान् उररीकृत्य अस्य ग्रन्थस्य रचना आसामप्रान्ते अभवद् इति स्वमतं प्रकाशितम्।[3]सम्भवतः मार्कण्डेयऋषिः अस्य ग्रन्थस्य रचयीता इत्यपि वदूषां मतम्।कामरूपप्रदेशस्य रत्नपाल (९२०-९६०) इत्यनेन सह सम्बद्धानां स्थानानां घटनानां च उल्लेखः दशम-शताब्द्याः अनन्तरं ग्रन्थं स्थापयति। तस्माद् अयं एकादश-शताब्द्याःअथवा द्वादश-शताब्द्याः ग्रन्थः इति प्रस्तावः।अस्मिन् ग्रन्थे नवतिः त्रिनवतिः वा अध्यायाः विविधसंस्करणेषु उपलभ्यन्ते।इदमपि दुर्लभेषु हिन्दुग्रन्थेषु अन्यतमम् अस्ति यत्र वस्तुतः "हिन्दुः" इति शब्दस्य उल्लेखः अस्ति।[4]

**(2)योगीनितन्त्रम्**– आसामराज्ये रचितम् इदं तन्त्रम्। अस्य समयः प्रायः षोडश-शताब्दितः सप्तदश-शताब्द्याभ्यन्तरे इति। अस्यां काल्याः कामाख्यादेव्याः च पूजनस्य रीतिः, वामाचारस्य षट्कर्माणि(शान्तिः, वशीकरणम्, स्तम्भनम्, विद्वेषणम्, उच्चाटनम्, मारणश्चेति), शक्तिपीठानां वर्णनम्इत्यादि विषयाः वर्णिताः सन्ति।तन्त्रमिदं पूर्वः उत्तरश्चेति खण्डद्वये विभक्तम्। पूर्वखण्डे ऊनविंशति पटलाः, उत्तरखण्डे नवसंख्यकाः पटलाश्च वर्तन्ते। तन्त्रमिदम् प्रकाशितम्।

**(3)कामाख्यातन्त्रम्**– एकादशपटलेषु उपनिबद्धं तन्त्रमिदम्। अस्मिन् ग्रन्थे कामाख्यादेव्याः स्वरूपः, मन्त्रोद्धारः, साधनापद्धतिः, गुरुतत्वः, कामकलासाधनपद्धतिः, शक्तिपीठानां वर्णनम् इत्यादयः विषयाः वर्णिताः सन्ति।प्रकाशितोऽयं तन्त्रिकग्रन्थः।

**(4)तारार्चनतन्त्रम्** – अस्यतान्त्रिकग्रन्थस्याभिधानमेव ज्ञापयति यद् अस्मिन् देव्याः तारायाः पूजनपद्धतेः विवरणं करोतीति। अपूर्वचन्द्रमहोदयस्य विवरणानुसारम्

---

[2]Kalika Purana - Wikipedia
[3]*ibid*
[4]*ibid*


©Indira Gandhi National Open University

अयं ग्रन्थः गौहाट्यां श्रीमता चक्रेश्वर-भट्टाचार्येण सम्पाद्य प्रकाशितम्।अस्य संस्करणस्य महत्वविषये अपूर्वचन्द्रः वदति –"*Charkreswar Bhattacharya has rendered a very valuable service to the readers by handing over to them the content of this work [Tararcana Tantra] in full form.*"[5]

**(5) कामरूपयात्रापद्धतिः**– अस्य ग्रन्थस्य रचयिता हलिराम-शर्मा अथवा हलिराम-डेकियाल-फुकन। अस्य ग्रन्थस्य रचनाकालः 1827-1830A.D.। अस्मिन् कामाख्यादेव्याः तान्त्रिकपूजापद्धत्याः विवरणम् दशसंख्यकैः पटलैः कृतम् वर्तते।[6] तस्मादस्य ग्रन्थस्यान्तर्भावः तान्त्रिकग्रन्थेषु कृतः श्रीअपूर्वचन्द्रवर्येण। ग्रन्थस्यास्य महत्वं वर्णयित्वा सः लिखति –

> "*Halirama Sharma has made a sincere attempt to give his readers an appropriate knowledge of the religious activities performed in the tirthas of Assam and the effects of these religious activities in order to inspire the people of this land and worshipers of Gods and Goddesses in these tirthas in particular to dedicate themselves to these religious activities.*"[7]

उपरि उक्तान् तान्त्रिकग्रन्थान् विहाय आसामराज्ये कतिपयानां संस्कृतभाषया लिखितानां तन्त्रिकग्रन्थानां अहमभाषान्तराणि अपि उपलभ्यन्ते। तादृशेषु अनुदित-तान्त्रिकग्रन्थेषु अन्यतमं **कामरत्नतन्त्रम्**। अस्य ग्रन्थस्य रचनाकालः प्रायः पञ्चदशशतकः इति विदूषां मतम्।[8] पण्डित-हेमचन्द्र-गोस्वामी-महाभागेन तन्त्रमिदम् सम्पाद्य 1928तमे वर्षे प्रकाशितम्। अस्मिन् पुस्तके त्रयोदश पटलाः सन्ति। येषु तान्त्रिक-षट्-कर्माणां वर्णनं प्रामुख्येन उपलभ्यते। पुस्तकस्य विषये सम्पादकः हेमचन्द्र-गोस्वामी महाभागः भूमिकायां वदति –

> "*It is presumed that the book under review is an Assamese translation of the original Sanskrit work. A book called Kamaratna Tantra and Vashikarana Tantra was published in Calcutta by Babu Matilal Bose, so far back as 1319 B.E. This book, besides the Sanskrit text, contains a Bengali translation by Pandit Kalipada Vidyaratna. In the preface of that book, it has been described to be the work of one Nagabhatta.*"[9]

अस्य ग्रन्थस्य मूलसंस्कृतश्लोकैः सह हिन्दीभषानुवादः पण्डित-श्यामसुन्दरशर्मणा 1897तमे वर्षे प्रकाशितम्। तस्मिन् संस्करणे ग्रन्थस्यास्य षड्-परिच्छेदाः सन्ति।

---

[5] Barthakuria, 2009, p.33
[6] ibid
[7] Ibid, p.181
[8] Sanjay Kumar, 2021,p.246
[9] Goswami, Hemachandra (Ed.), 1928, Preface, p.i


©Indira Gandhi National Open University

एतदतिरिच्य योनितन्त्रम् इत्यादीनां तन्त्रिकग्रन्थानाम् अपि अहम-भाषया अनुदितरूपाणि उपलभ्यन्ते।

इत्थमासीत् प्रकाशिताः आसामराज्यसम्बन्धाः तान्त्रिकग्रन्थाः। निम्नोक्ताः सन्ति आसामराज्यसम्बन्धाः उद्धरणमात्रैणेव समुपलब्धाः अप्रकाशितग्रन्थाः, येषाम् उल्लेखः अपूर्वचन्द्रेण स्वपुस्तके क्रीयते। एतादृषानां ग्रन्थानाम् उल्लेखः श्रीमता पीताम्बर-सिद्धान्तवागीशेन स्वस्य तीर्थकौमुद्याख्ये पुस्तके करोति।अत्रेदम् अवश्यं ज्ञापनीयं यत् पीताम्बरसिद्धान्तवागीशः षोडषशतकीयः कामरूपस्य विख्यातः स्मृतिनिबन्धग्रन्थकारः आसीत्। तेन रचितेषु स्मृतिनिबन्धग्रन्थेषु तीर्थकौमुदीअन्यतमः।

(1) बृहद्गवाक्षतन्त्रम्- अस्मिन् तन्त्रे कामरूपस्य शक्तिपीठानां तन्त्रपरम्परायाश्च उल्लेखः अस्ति इति आमनन्ति विद्वांसः अपूर्वचन्द्र-वडठाकुरिया-महाभागाः। एषः महाभागः तस्य पुस्तकेअस्यग्रन्थस्य अनुपलब्धतां संसूचयन् वदति –"*Unfortunately, only some fragments of the Brihadgavaksha[Tantra] are restored to us by the author of the Tirthakaumudi. Therefore, the readers are deprived of gathering a comprehensive knowledge of the contents of the Brihadgavaksha Tantra.*"[10]अस्य तन्त्रस्य आसाममूलकत्वविषयेअपूर्वचन्द्र-महाशयः वदति यत् –"*It appears to us from a passage quoted in the Tirtha Kaumudi that the Brihadgavaksha [Tantra] was fully acquainted with the religious worship of the Tantric seats of Assam which proves its local origin.*"[11]एतद्ग्रन्थस्य उद्धरणं बहुत्र अन्यग्रन्थेषु उपलभ्यते इति प्रतिभाति मे।अस्य तन्त्रस्य नाम्ना इदं प्रतिभाति जदिदं तन्त्रम्गवाक्षतन्त्रस्य विस्तारितं रूपम् इति।

(2) गवाक्षतन्त्रम् –अस्माद् ग्रन्थादुद्धृतयः स्मृतिनिबन्धकारेण पीताम्बरेण स्वस्य तीर्थकौमुद्यां नैकेषु कामरूपसम्बन्धित-तीर्थवर्णप्रसङ्गेषु कृताः वर्तन्ते। तेषु अन्यतमाः उमानन्दतीर्थस्य, सौभाग्यकुण्डस्य, कम्बलवटुकस्य, भैरवीपीठस्य, कामेश्वर-शिवस्य, गुप्तकामाख्यायाः, गायातीर्थस्य, गुप्तेश्वर-शिवस्यच प्रसङ्गाः। अपूर्वचन्द्रमहोदयेन अस्य ग्रन्थस्य रचनास्थानविषये वदति यत् –

> *"Though some fragments of the Gavakṣa Tantra have been preserved by the Trithakaumudi, and no other source is available to the readers for gathering a comprehensive idea of its text, it can be easily understood from the small portion of the Tantra preserved by the Trirthakaumudi that it was purely a literary product of ancient Kāmarūpa."*[12]

[10] Barthakuria, 2009, p.21
[11] *ibid*
[12] *ibid*, p.23


©Indira Gandhi National Open University

(3) मत्स्यतन्त्रम्– पूर्ववदयं तान्त्रिकग्रन्थः कामरूपस्य प्रचीनतीर्थानां महत्वं प्रतीपादनप्रसङ्गे पीताम्बरेण तीर्थकौमुद्याम् उद्धृतः। धवला–नन्द्यांनवतोया–नद्यां च स्नानेन प्राप्तपूण्यस्य वर्णनप्रसङ्गे तीर्थकौमुद्याम् अस्य ग्रन्थस्य उद्धरणं प्राप्यते। एतदतीरीच्य कश्चन मत्स्यसूक्ताख्यः तान्त्रिकग्रन्थः तीर्थकौमुद्याम् उद्धृतः इति अपूर्वचन्द्रः तस्य पुस्तके प्रतिपादयति।

(4) त्रिपुरार्णवतन्त्रम्–आसामराज्ये स्थितस्य कामाख्यापीठस्य विस्तृतं वर्णनं प्राप्यते अस्मिन् ग्रन्थे। अपिच यतो हि त्रिपुरा कामाख्यादेव्याः नामान्तरमात्रम्।तस्मादयं ग्रन्थः आसामराज्ये रचितः इत्यामनन्ति अपूर्वचन्द्र–महाभागाः।[13]अयं च ग्रन्थः कामरूपस्य आसामराज्यस्य वा तीर्थानां वर्णनप्रसङ्गे पीताम्बरेण तीर्थकौमुद्याम् उद्धृतः।

(5) उत्तरतन्त्रम्–अस्मिन् ग्रन्थे उल्लिखिताः कामाख्या–पूजनपराः श्लोकाः अस्य तन्त्रस्य आसामसम्बन्धं द्योतयति। तीर्थकौमुद्याम् उद्धरणमात्ररूपेणावस्थितिः अस्य ग्रन्थस्य। तस्माद् अस्य ग्रन्थस्य विषये निश्चयेन किमपि वक्तुं दुष्करम्।

(6) कामेश्वरतन्त्रम्–कामाख्यादेव्याः पूजने व्यवहृतानां बीजमन्त्राणामुल्लेखः करोतीति कारणात् तन्त्रमिदम् आसामे रचितम् इत्यनुमितिः। तीर्थकौमुद्यामुद्धरणादचिरीत्य अस्यग्रन्थस्य विषये न किमपि ज्ञायतेदानीम्।

(7) वाराहीतन्त्रम्–अस्मिन् तन्त्रे“महाश्मशाने देवेशी तथा नीलाह्वये गिरौ। एकन जन्मना मुक्तिरन्यत्र सप्तजन्मभिः।।” इत्यस्यश्लोकस्योल्लेखाधारेण अस्य गन्थस्य रचना आसामदेशे इति मतं अपूर्वचनद्रस्य।

(8) कामाख्यागुह्यसिद्ध्याख्यम् तन्त्रम्-नाथसम्प्रदायस्य प्रमुखः मत्स्येन्द्रनाथः अस्य तन्त्रस्य लेखकः इति पारम्पारिकः विश्वासः। तन्त्रे अस्मिन् कामाख्यायाः नामोल्लेखम्, अपि च अकुलवीराख्यस्य तन्त्रस्य पुष्पिकायां मत्स्येन्द्रनाथः कामरूपिस्थानस्य निवासी इति वर्णनं च मनसि निधाय तन्त्रमिदम् आसामप्रान्ते रचितः इति मतं विदुषाम्। अस्य तन्त्रस्य केचन पत्राणि एव नेपालदेशस्य दरवाराख्ये ग्रन्थालये संरक्षितानि प्राप्यन्ते।[14]

उपरोक्तान् तान्त्रिकग्रन्थान् विहाय अपूर्वचन्द्रेण स्वपुस्तके दूर्गातन्त्रं वैष्णवीतन्त्रं चापि असामराज्ये उपनिबद्धेषु तन्त्रेषु अन्तर्भावयति।उपर्युक्ताः विशेषेण तीर्थकौमुद्याम् उद्धरणमात्रेणैवोल्लिखाः तान्त्रिकग्रन्थाः यद्यपि कामरूपस्य आसामराज्यस्य वा तीर्थानां वर्णनप्रसङ्गे समुद्धृताः तथापि मामिदं प्रतिभाति यद् केवलम् एकस्मिन् ग्रन्थे उद्धृतानां श्लोकानाम् उद्धृतिप्रसङ्गस्य च आधारेण कस्यापि ग्रन्थस्य रचनायाः सुनिश्चयः स्थाननिर्णयः दुःशक्यम्। तस्माद् वाराहीतन्त्रस्य दूर्गातन्त्रस्य मत्स्यतन्त्रस्य वैष्णवीतनत्रस्य च रचनायाः स्थानम् आसामराज्यं कामरूपं वा इति विषये मे दृढः

[13]*ibid*, p.29
[14]*ibid*, p.35

संशयः। प्रसङ्गेऽस्मिन् अन्यच्चोल्लेखयोग्यः विषयः यद्उपरोक्तानां ग्रन्थानां तीर्थकौमुदीमतिरीच्य अन्येषु ग्रन्थेषु उपलब्धानमुद्धरणानां एकत्रीकरणं गवेषणात्मकविश्लेषणं च ग्रन्थानां रचनायाः स्थाननिर्णयं सुदृढं कुर्यादिति। एतेषां ग्रन्थानां मातृकाग्रन्थानामुपलब्धिस्तु अस्मिन् विषये सर्वोत्कृष्टः सहायकः स्यात्। तस्माद् यावद् पर्यन्तम् उपर्युक्तरीत्या गवेषणा नैव कृता उपर्युक्तग्रन्थानां मातृकाग्रन्थाश्चः साक्षात् नैव प्राप्ताः तावत् पर्यन्तम् एते ग्रन्थाः आसामराज्ये उपनिबद्धाः तान्त्रिकग्रन्थाः इति स्वीकारेण क्लेशः न स्यादिति मे मति।

उत्तरपूर्वभारते मम तन्त्रग्रन्थानाम् अन्वेषणस्य द्वितीयं क्षेत्रं त्रिपुराराज्यम्। यते हि अस्माभिः ज्ञायते एव तन्त्रपीठेषु अन्यमः अस्ति त्रिपुराज्ये स्थितं मातुः त्रिपुरासुन्दर्याः मन्दिरम्। शक्तिपीठानां गणनायां[15] अस्य स्थानस्य संयोजनं यद्यपि कामरूपवत् सुप्राचीनतमं न, तथापि शक्तिपीठरूपेण अस्य स्थानस्य उल्लेखः प्रप्रथमं प्रायः सप्तदशशतके अथवा अष्टादशशतके[16]विरचिते पीठनिर्णयाख्येअथवा महापीठनिरूपणाख्येग्रन्थे प्राप्यते।यत्र एकपञ्चाशत्सु शक्तिपीठेषु त्रिपुरासुन्दर्याः पीठः षोडशतमः शक्तिपीठः।

त्रिपुरायां दक्षपादो देवी त्रिपुरसुन्दरी ।
भैरवस्त्रिपुरेशश्च सर्वाभीष्टप्रदायकः।।18।।[17]

अत्र धातव्यः विषयः यत् त्रिपुराराज्ये विरचिते राजमालाख्ये ग्रन्थे च अयं श्लोकः प्राप्यते।एतस्माद् इदम् अनुमीयते यत् पूर्वोत्तरभारते अर्वाचनशक्तिपीठेषु त्रिपुरा अन्यतमः इत्यत्र नास्ति सन्देहः। अपि च चतुर्दशदेवतानाम् आराधनम् त्रिपुरायां शक्तिउपसनायाः तान्त्रिकपद्धत्या पूजनपरम्परायाश्च सूचना ददाति। तथापि स्वतन्त्रतया त्रिपुरायाम् उपनिबद्धः तान्त्रिकग्रन्थः दुर्लभः वद् मे भाति। अस्मिन् विषये कृते प्रयासे मया हरेकृष्ण-आचार्य-महेदयस्य पुस्तके तस्य मातृकासङ्ग्रहालये योगिनीतन्त्रस्य मातृकायाः उपलब्धेःसूचना प्राप्ता। यद्यपि प्रायः विवरणेषु त्रिपुरायां पूजासु यद्यपि तान्त्रिकरीत्याः अनुसरणं भवतीति सूचना प्राप्यते, किन्तु

[15]भारतेशक्तिपीठानांसंख्याविविधेषुग्रन्थेषुभिन्नरूपेणलिपिबद्धानिसन्ति।सर्वादौअष्टमशतकीयेहेवज्रतन्त्रेजलन्धरः, उड्डीयानः, पूर्णगिरिः, कामरूपश्चइत्येतेषांशाक्तपीठचतुष्टयानाम्उल्लेखप्राप्यते।अन्तरंकालिकापुराणेचतुर्णांसप्तानांचद्विविधनांशाक्तपीठनामावलेःउल्लेखःप्राप्यते।पश्चात्शक्तिपीठानांएषासंख्यादशः, दशाद्अष्टादशः, अष्टादशाद्सप्तदशशतकीयेपीठनिर्णयाख्येग्रन्थेएकपञ्चाशत्, पश्चात्सासंख्या 108 अभवद्। (The Path of Power: Impurity, Kingship, and Sacrifice in Assamese Tantra, Author(s): Hugh B. Urban, 2001)

[16]The text of the Pithanirnaya or Mahapithanirupana, which is silent as to the date of its composition, seems to have been prepared in the late medieval period. The number of the recognized Pithas given as fifty-one probably points to the seventeenth or the eighteenth century. Dines Chandra Sircar, The Shakta Pitha, p.4

[17] Regarding this verse D. C. Sircar observes that – "The original reading was apparently त्रिपुरायांदक्षपादोदेवतात्रिपुरानलः with the second line of the verse omitted (cf.p.46, nte4)." Also, other readings recorded in the Sircar's book are: "D (v.I.) E – देवतात्रिपुरामाता; G -देवतात्रिपुरानलः।AM (Bengali version of the Pithanirnaya in the Pithamala section of the Annadamangala by Bharatchandra, Vangavasi ed.) – দক্ষিণচরণখানপিড়ত্রেপুরায়।নলনামভৈরবত্রপুরাদবৌতায়।।- D. C. Sircar, p.47


©Indira Gandhi National Open University

सुनिश्चिततया कस्यापि ग्रन्थस्य उल्लेखः न प्राप्तम् मया। अन्तर्जालीया सूचनानुसारं विचारनन्त्ररीत्या[18] मातुः त्रिपुरसुन्दर्याः पूजनं भवति इति।

अपि च मया यदा कालीप्रसन्न-सेन-महाभागेन सम्पादितं राजमालाम् अन्विष्टम् तदानीम् केचनतन्त्रग्रन्थानाम् उल्लेखः तत्र प्राप्तः। तेषु ग्रन्थेषु श्लोकानाम् उद्धरणेन सेन-महाभागः राजमालाख्यग्रन्थे उक्तानान् तथ्यानान् सुपुष्टम् करोति। राजमालाख्ये ग्रन्थे उद्धृताः ते तान्त्रिकग्रन्थाः यथा - प्रथमलहरे कामाख्यातन्त्रम्, कालिकापुराणम्, कुब्जिकातन्त्रम्, पीठमालातन्त्रम्, बृहन्नीलतन्त्रम्, महानिर्वाणतन्त्रम्, योगिनीतन्त्रम्, राजराजेश्वरीतन्त्रम्, शक्तिमङ्गलतन्त्रम्; द्वितीयलहरे कालीविलासतन्त्रम्, चामुण्डातन्त्रम्, तन्त्रविभूतिः, तन्त्रसारः, वाराहीतन्त्रम्, बृहन्नीलतन्त्रम्, योगिनीतन्त्रम्, योगिनीहृतयः, रुद्रयामलतन्त्रम्, शक्तिसङ्गमतन्त्रम्; तृतीयलहरे कुलार्णवतन्त्रम्, तन्त्रचूडामणिः, मेरुतन्त्रम्।

इतोपि सूक्ष्मरूपेण चिन्तयामश्चेद् वयं ज्ञान्तुं शक्नुमः यत् इदानीन्तनं त्रिपुराराज्यं प्रायः प्राचीनकाले आसामराज्ये अथवा अविभक्तवङ्गदेशे अन्तर्भुक्तः प्रभावितश्च आसीत्। तस्माद् अत्रत्याः पूजापद्धतयः प्रायः आसामदेशे रचितानां तन्त्रिकग्रन्थानाम् अनुसरणेन अथवा वङ्गदेशे रचितानां तान्त्रिकग्रन्थानां अनुसरणेन स्याद् इति मे प्रतिभाति। तथापि त्रिपुराराज्ये उपनिबद्धानां तान्त्रिकग्रन्थानां विषये इतोप्यधिक-गवेषणा आवश्यकी।

इत्थम् उपरि पूर्वोत्तरभारते उपनिबद्धानां तान्त्रिकग्रन्थानां विषये यन् मया आलोचितः तद् सागरे जलबिन्दुवद् एव। पूर्वोत्तरे ग्रन्थालयेषु उपलब्धानां मातृकाग्रन्थानां सूक्ष्माध्ययनेन अस्मिन् विषये इतोऽपि अधिकतथ्यः लोकलोचनं समागच्छेद् इति मे मतिः।

## BIBLIOGRAPHY


1. Barthakuria, *Apurba Chandra, The Tantric Religion of India: An Insight into Assam's Tantra Literature*, PunthiPustak, Kolkata, 2009.
2. Dines Chandra Sircar, *The Shakta Pitha*s, Motilal Banarasidas, New Delhi, 1948.
3. Urban, Hugh B., *The Womb of Tantra: Goddesses, Tribals, and Kings in Assam*, The Journal of Hindu Studies, 2011, 4, pp.231-247, (Downloaded from http://jhs.oxfordjournals.org/)


[18]Here, the Devi is being worshipped through Shorashi Yantra, Iviantra of ShorashiKall and keeping with Vichaar Tantra. -Tripura, the land of fourteen gods and million statues



©Indira Gandhi National Open University

4. Patowary, Kamal Nayan, *The Kalika Purana and the Yogini Tantra: A Comparative Study in Reference to Great Indian Rivers*, Ananta – International Journal of Sanskrit Research, 2016, 2(1), pp.04-07.
5. Urban, Hugh B., *The Path of Power: Impurity, Kingship, and Sacrifice in Assamese Tantra*, Journal of the American Academy of Religion, Dec. 2001, Vol. 69, No. 4, pp. 777-816. (DownloadedfromJSTOR)
6. Kumar Ranjeet, *Date and Authorship of the Tantras: A Note*, Proceedings of the Indian History Congress, 2000-2001, Vol. 61, Part – One, pp. 121-125, (Downloaded from JSTOR)
7. Goswami, Hemchandra (Ed.), *Kamaratna Tantra* (Assamese Version with English Translation), Printed at the Assam Government Press, Shillong, 1928.
8. Das, Matilal, *Pithamala Tantra/পীঠমালামহাতন্ত্র* (মূলওবাঙ্গালাগদ্যানুবাদ), সুধাসিন্ধুযন্ত্রমুদ্রিত, সন১২৯৮সাল.
9. Mishra, Kanhaiyalal (Ed.), *Yogini Tantra/योगिनीतन्त्र* (मूलएवंहिन्दीअनुवादसहित), लक्ष्मीवेंकटेश्वरछापाखाना.
10. Chaturvedi, Radheshyam (Ed. & Trans.), *Kamakhyatantram/कामाख्यातन्त्रम्* (ज्ञानवती-हिन्दीभाष्येणविभूषितम्), ChowkhambaSurabharati Prakashan, Varanasi, 2004.
11. Kumar Sanjay, *A Study of Kamakhya Temple in its Multiple Contexts*, International Journal for Advanced Research In Science & Technology, Vol. 11, Dec. 2021, pp. 246-253.
12. Sharma, Shyamsundar (Ed. & Trans.), *Kamaratna Tantra* (Sanskrit Text with Hindi Translation), Pandit HariharaprasadPathak ManagerSatyasindhu and Medical Yantralaya, 1897.
13. Poddar, Satyadeo (Ed.), *History of Tripura: As Reflected in the Manuscripts*, National Mission for Manuscripts, IGNCA, New Delhi, 2016.
14. Acharya, Harekrishna, *PunthiSampadanaEbangTripurarPunthi Prasanga/পুঁথিসম্পাদনাএবংত্রিপুরারপুঁথিপ্রসঙ্গ*, Book Words, Jagannath Bari, Agartala, 2018.
15. Das Shastri, Rabindranath, *Lectures on Indology*, Rohini Prakashani, 2011.
16. Tripura, Alindralal, *Traipura Samhita/ত্রৈপুরসংহিতা*, Tripura State Tribal Cultural Resarch Institute & Museum, Govt. of Tripura, 1996.
17. Sen, Kaliprasanna (Ed.), *Rajamala (Bengali)*, Vol. (Lahar) I-IV, Upajati Samskriti Gabeshana Kendra, Govt. of Tripura, 2003.


©Indira Gandhi National Open University